कर्पूर आरती मन्त्रः

{॥ कर्पूर आरती मन्त्रः ॥}

श्रियः कान्ताय कल्याण निधये निधयेऽर्थिनां

श्रीवेङ्कटनिवासाय श्रीनिवासाय मङ्गलम् ॥ १

लक्ष्मीचरणलाक्षाङ्कसाक्षिश्रीवत्सवक्षसे ।

क्षेमङ्कराय सर्वेषां श्रीरङ्गेशाय मङ्गलम् ॥ २॥

समस्तजीवमोक्षाय श्रीरङ्गपुरवासिने ।

कन्द्वादमुनिपूज्याय श्रीनिवासाय मङ्गलम् ॥ ३॥

अस्तु श्रीस्तनकस्तूरीवासनावासितोरसे ।

श्रीहस्तिगिरिनाथाय देवराजाय मङ्गलम् ॥ ४॥

कमलाकुच कस्तूरी कर्दमाङ्गित वक्षसे ।

यादवाद्रिनिवासाय सम्पत्पुत्राय मङ्गलम् ॥ ५॥

मङ्गलं कोसलेन्द्राय महनीयगुणाब्धये ।

चक्रवर्तितनूजाय सार्वभौमाय मङ्गलम् ॥ ६॥

श्रीमद्गोपालबालाय गोदाभीष्टप्रदायिने ।

श्रीसत्यासहिताथास्तु कृष्णदेवाय मङ्गलम् ॥ ७॥

नीलाचलनिवासाय नित्याय परमात्मने ।

सुभद्राप्राणनाथाय जगन्नाथाय मङ्गलम् ॥ ८॥

आजन्मनः षोडशाब्दं स्तन्याद्यनभिलाषिणे ।

श्रीशानुभवपुष्टाय शठकोपाय मङ्गलम् ॥ ९॥

श्रीमत्यै विष्णुचित्तार्यमनोनन्दनहेतवे ।

नन्दनन्दनसुन्दर्यै गोदायै नित्य मङ्गलम् ॥ १०॥

श्रीमन्महाभूतपुरे श्रीमत्केशवयज्वनः ।

कान्तिमत्यां प्रसूताय यतिराजाय मङ्गलम् ॥ ११॥

मङ्गलाशासन परैर्मदाचार्य पुरोगमैः

सर्वैश्च पूर्वैराचार्यैः सत्कृतायास्तु मङ्गलम् ॥ १२॥

श्रीमते रम्यजामात्रे मुनीन्द्राय महात्मने

श्रीरङ्गवासिने भूयात् नित्यश्रीर्नित्यमङ्गलम् ॥ १३॥

Please send corrections to sanskrit@cheerful.com

Last updated त्oday

http://sanskritdocuments.org

Karpoora Arati Mantrah Lyrics in Devanagari PDF
% File name : karpuuraarati.itx
% Category : AratI
% Location : doc_vishhnu
% Language : Sanskrit
% Subject : hinduism/religion
% Transliterated by : N
% Proofread by : N
% Latest update : October 11, 2001
% Send corrections to : Sanskrit@cheerful.com
% Site access : http://sanskritdocuments.org
%
% This text is prepared by volunteers and is to be used for personal study
% and research. The file is not to be copied or reposted for promotion of
% any website or individuals or for commercial purpose without permission.
% Please help to maintain respect for volunteer spirit.
%

We acknowledge well-meaning volunteers for Sanskritdocuments.org and other sites to have built the collection of Sanskrit texts.
Please check their sites later for improved versions of the texts.
This file should strictly be kept for personal use.
PDF file is generated [December 10, 2015] at Stotram Website